श्री अय्यप्प पंचरत्नं

श्री अय्यप्प पंचरत्नं

लोकवीरं महापूज्यं सर्वरक्षाकरं विभुम् |
पार्वती हृदयानंदं शास्तारं प्रणमाम्यहम् || 1 ||

विप्रपूज्यं विश्ववंद्यं विष्णुशंभोः प्रियं सुतम् |
क्षिप्रप्रसादनिरतं शास्तारं प्रणमाम्यहम् || 1 ||

मत्तमातंगगमनं कारुण्यामृतपूरितम् |
सर्वविघ्नहरं देवं शास्तारं प्रणमाम्यहम् || 3 ||

अस्मत्कुलेश्वरं देवमस्मच्छत्रु विनाशनम् |
अस्मदिष्टप्रदातारं शास्तारं प्रणमाम्यहम् || 4 ||

पांड्येशवंशतिलकं केरले केलिविग्रहम् |
आर्तत्राणपरं देवं शास्तारं प्रणमाम्यहम् || 5 ||

पंचरत्नाख्यमेतद्यो नित्यं शुद्धः पठेन्नरः |
तस्य प्रसन्नो भगवान् शास्ता वसति मानसे ||